ण्डीकरणादूर्द्ध्वं यत्र यत्र प्रदीयते। तत्र तत्र त्रयं कुर्य्याद्वर्जयित्वा मृताहनि” इति शङ्खवचनाच्च। ननु “अन्येषान्तु विगर्हिता” इति श्रवणात् कथं त्रैपुरुषिकपार्वणविधिः न यस्य पुरुषास्त्रय एव शस्त्रहतास्तस्य त्रैपुरुषिकविधिरुपपद्यत एव यस्य द्वौ शस्त्रहतौ एको वा तेनापि द्वैपुरुषिकैकपुरुषिकमेव पार्वणं कर्त्तव्यं यथा मनुः “पिता यस्य तु वृत्तः स्याज्जीवेद्वापि पितामहः। पितुः स नाम संकीर्त्त्य कीर्त्तयेत् प्रपितामहम्” तथा हारीतः “पितामहोऽपि जीवेद्वै पितर्य्येव समापयेत्”। नन्वेकोद्दिष्टमात्रं श्रूयते यथाह गार्ग्यः “सपिण्डीकरणादूर्द्ध्वं मृते कृष्णचतुर्दशीम्। प्रतिसंवत्सरादन्यदेकोद्दिष्टं न कारयेत्” यमः “सपिण्डीकरणादूर्द्ध्वं यत् पितृभ्यः प्रदीयते। एकोद्दिष्टविधानेन प्रदेयं शस्त्रघातिने” भविष्यपुराणे “समत्वमागतस्यापि पितुः शस्त्रहतस्य च। चतुर्दश्यां तु कर्त्तव्यमेकोद्दिष्टं न पार्वणम्। चतुर्दश्यां तु यत् श्राद्धं सपिण्डीकरणे कृते। एकोद्दिष्टविधानेन प्रदेयं शस्त्रघातिने” उच्यते। एषां वचनानाममूलत्वात् समूलत्वेऽपि पार्वणाशक्तविषयकाण्येतानि विष्णुादिवचनेषु पार्वणावगतेः। भ्रातादीनान्तु शस्त्रहतानाम् एकोद्दिष्टविधिना कार्य्यम्। “अपुत्रा ये मृताः केचित् स्त्रियो वा पुरुषाश्च ये। तेषामपि च देयं स्यादेकोद्दिष्टं न पार्वणम्” इत्यापस्तम्बवचने पार्वणनिषेधात्। तच्च न सकलकृष्णपक्षसाधारणं विष्णुादिवचने श्राद्धशब्दस्य पार्वणपरत्वोक्तेः। किन्त्वाश्विनमासीयकृष्णपक्षविषयम्। ब्रह्मपुराणे “प्रायानशनेत्यादिना सकलकृष्णपक्षसाधारणं श्राद्धमभिधायाश्विने “तर्पणीयाश्चतुर्दश्यां लुप्तपिण्डोदकक्रियाः” इति पुनरभिधानं तच्छस्त्रहतभ्रात्रादिविषयम् अतएव तत्रैव “अमावास्यायां पितरः पूज्या नान्दीमुखा अपीति” वृद्धप्रपितामहादीनामपि श्राद्धं दर्शितम्। इयञ्च चतुर्दश्यामशस्त्रहतश्राद्धनिन्दा आश्विनमासीयकृष्णपक्षश्राद्धादिकल्पव्यतिरिक्तसामान्यकृष्णपक्षविहितश्राद्धकाम्यश्राद्धविषया प्रकरणभेदेन श्राद्धकर्मभेदात् सामान्यविशेषन्यायाच्च इतरथा चतुर्दश्यां संक्रान्तिश्राद्धेऽशस्त्रहतनिन्दास्यात् अतएव “कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीमिति” मनुवचनेऽपि चतुर्दशीवर्जनं पक्षश्राद्धादिव्यतिरिक्तविषयम्। ननु शस्त्रादिहतानां श्राद्धनिषेधः श्रूयते यथा छागलेयः “शस्त्रविप्रहतानाञ्च शृङ्गिदंष्ट्रिसरीसृपैः। आत्मनस्त्यागिनाञ्चैव श्राद्धमेषां न कारयेत्”। सत्यं बुद्धिपूर्वकमृतानामेव। प्रमादमृतानाञ्च श्राद्धादिकमाह अङ्गिराः “अथ कश्चित् प्रमादेन म्रियतेऽग्न्युदकादिभिः। अशौचं तस्य कर्त्तव्यं कर्त्तव्या चोदकक्रिया”। अबुद्धिपूर्वकमपि शृङ्ग्यादिभिः क्रीड़ां कुर्वतां मृतानां न कर्त्तव्यम्। ब्रह्मपुराणे “शृङ्गिदंष्ट्रिनखिव्यालविषवह्निस्त्रिया जलैः। आदरात् परिहर्त्तव्यः कुर्वन् क्रीड़ां मृतस्तु यः”। परिहर्त्तव्यः श्राद्धादौ। शास्त्रानुमत्या बुद्धिपूर्वकमृतानामपि कर्त्तव्यम्। गर्ग्यः “नष्टशौचस्य तिल्लुप्तप्रत्याख्यातभिषक्क्रियः। आत्मानं घातयेद्यस्तु भृग्वग्न्यनशनादिभिः। तस्य त्रिरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः। तृतीये तूदकं कृत्वा चतुर्थे श्राद्धमिष्यते”। एवं क्रीड़ाव्यतिरेकेणाऽबुद्धिपूर्वमृताः शास्त्रानुमत्या च बुद्धिपूर्वकमृता अपि श्राद्धार्हाः। कथम् लुप्तपिण्डोदकत्वम् इति चेत् शृणुमिति ब्रूमः बुद्धिपूर्वकमृते पिण्डोदकक्रियालोपात्”।

**शस्त्राभ्यास** पु० ६ त०। शस्त्रप्रयोगशिक्षायां त्रिका०। [जनि०।

**शस्त्रायस** शस्त्रयोग्यमयः अच्समा०। लौहभेदे (इस्पात) रा-

**शस्त्रिन्** त्रि० शस्त्रमस्त्यस्य इनि। शस्त्रविशिष्टे।

**शस्त्री** स्त्री स्वल्पं शस्त्रं ङीप्। छुरिकायाम् मेदि०।

**शस्प** न० शस-प। बालतृणे घासे अमरे पाठान्तरम्।

**शस्य** न० शस-यत्। वृक्षादीनां फले “शस्यं क्षेत्रगतं प्राहुः सतुषं धान्यमुच्यते” इत्युक्ते क्षेत्रस्थे धान्यादौ च अस्य दन्त्यादित्वमपि नवशस्यसम्भोगनक्षत्राणि ज्यो० त० उक्तानि यथा “अनुराधा मृगशिरो रेवती चोत्तरात्रयम। हस्ता चित्रा यथा पुष्या श्रवणा च पुनर्वसुः। रोहिणी नवशस्यादिनवद्रव्याशनादिषु। प्रशस्तं नवपीठादिसम्भोगे यहविद्वदेत्”।

**शस्यध्वंसिन्** पु० शस्यं ध्वंसयति ध्वन्स-णिच्-णिनि। १ तृणवृक्षे (तुँद) शब्दच० २ शस्यनाशके त्रि०।

**शस्यमञ्जरी** स्त्री ६ त०। अभिनवधान्यादिशीर्षे अमरः।

**शस्यशूक** न० धान्यादेः शीर्षे अमरः। [अमरः।

**शस्यसम्बर** पु० शस्यं संवृणोति सम्+वृ-अच्। सालवृक्षे

**शस्याक** पु० शस्यमत्याकाति अक-उण्। कुरुवमीतृक्षे शब्दच०।

**शाक** पु०न० शक-घञ्। १ पत्रपुष्पादौ अमरः २ वृक्षभेदे पु० (सेगुण) इक्षौ च ३ शक्तौ ४ शिरीषवृक्षे पु० शब्दरत्ना०। ५ स्वराज्यावधि वत्सरप्रवर्त्तके राजभेदे ६ तदीये वत्सरे च पु० मेदि०। स्यति सामर्थ्यं शो-क तस्य नेत्त्वम्।